International Journal of Sanskrit Research 2023; 9(2): 333-334

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 333-334
© 2023 IJSR
www.anantaajournal.com
Received: 05-03-2023
Accepted: 10-04-2023

**ओम प्रिय**
सहायक प्राध्यापक व्याकरण, ग्राम़पत्रालय दृ मानपुरा थाना एन एच बंगरा, समस्तीपुर, बिहार, भारत

**Corresponding Author:**
**ओम प्रिय**
सहायक प्राध्यापक व्याकरण, ग्राम़पत्रालय दृ मानपुरा थाना एन एच बंगरा, समस्तीपुर, बिहार, भारत

# मुखं व्याकरणं स्मृतम्

**ओम प्रिय**

**प्रस्तावना**

'व्याक्रियन्ते विविच्यन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्यययादिविश्लेषण– पूर्वकमसाधुशब्देभ्यः साधुशब्दाः येन तद् व्याकरण'मिति करणव्युत्पत्त्या–असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिपूर्वकसाधुशब्दविषयकज्ञानकरणं व्याकरणमित्यर्थो लभ्यते। यथा गावी गोणी गोता इत्यदिभ्योऽसाधुशब्देभ्यः 'गोः' इत्यस्य साधुशब्दस्य पृथक्कृत्य ज्ञापनं व्याकरणशास्त्रायत्तम्। तच्च गमेरौणादिकः कर्तरि डोप्रत्यय इत्येवं प्रकृति प्रत्ययविभागपूर्वकमस्ति।

संस्कृतव्याकरणं वेदांतया वेदवत्प्राचीनं विद्यते। यतो गोपथब्राह्मणे', उपनिषदि, रामायणे, महाभारते च संस्कृतभाषायाः प्राणभूतस्य शब्दशास्त्रस्य कृते व्याकरणशब्दस्य प्रयोगो दरीदृश्यते ऋक्तन्त्रोक्त्या परिलक्ष्यते यत् संस्कृतव्याकरणशास्त्रस्यादिमप्रवक्ता ब्रह्मा आसीत्–''ब्रह्मा बृहस्पतये प्रवोच बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः ऋषयो ब्राह्मणेभ्यः तं खल्वक्षरसमाम्नायमित्याचक्षते''

**व्याकरणस्य द्वितीयः** प्रवक्ता बृहस्पतिः, इन्द्राय शब्दोपदेशं चकारेति पतंजलिरपि, ब्रूते तेभ्यमिदं प्रक्रियाकौमुदीकार रामचन्द्रोऽपि परिपुष्णाति। व्याकरणस्य तृतीयः प्रवक्ता इन्द्रो बभूव। इन्द्रो हि अव्याकृतां वाणीं प्रकृति–प्रत्यय–विभागादिसंस्कारयुक्ताञ्चकार। एवं पर्यालोचनेन सिद्धमिदं भवति यद् व्याकरणस्य प्रथमो वक्ता ब्रह्मा, प्रवक्ता बृहस्पतिः संस्कर्ता चेन्द्रः। तदनुभरद्वाज–गार्ग्य–गालव–शाकल्य– शाकटायन–प्रमुखा मुनयः ब्राह्मणाश्च संस्कृतव्याकरणस्योपस्कर्तारः संस्कर्त्तारश्चाभूवन्निति।

इत्थं इन्द्रं–वायु–भरद्वाज – भागुरि – पौषकरसादि– चारायण – काशकृत्स्न– वैयाघ्रपाद– माध्यन्दिनि – राधि – शौनकि– गौतम–व्याडय– त्रयोदश तथा आपिशलि–काश्यप– गार्ग्य – गालव–चाक्रवर्मण – भारद्वाज–शाकटायन–शाकल्य–सेनक– स्फोटायनाः – दशेति सुगणनया पाणिनेः प्राग्वर्तिनः त्रयोविंशतिः वैयाकरणाः वैयाकरणाः श्रूयन्ते। तेषु आपिशलादि स्फोटायनान्तानां दशाचार्याणां नामग्रहणं स्वयं भगवान् पाणिनिश्चकार। पाणिनीयव्याकरणवैलक्षणम् : सत्स्वपि नैकविधेषु संस्कृतव्याकरणेषु पाणिनीयव्याकरणस्य सूत्रात्मकतया श्रुतिमूलकतया लाघवेन वैदिकलौकिकोभयशब्दसाधुत्वपरत्वेन सर्वांपूर्णत्वेन च समस्तसंस्कृत–व्याकरणापेक्षया निरूपमं वैलक्षण्यं समनुभूयते। महर्षिपाणिनिना महत्ता प्रयत्नेन अष्टाध्यायी–नामधेयो विलक्षणोऽद्वितीयश्च ग्रन्थो निरमायि। यस्य सार्वजनीनं महत्वं प्रसिद्धा गाभीरार्थवती लोकाक्तिरियं प्रतिपादयति–

अष्टाध्यायी जगन्माताऽमरकोशो जगत्पिता। वस्तुतः पाणिनेरष्टाध्यायीनाम ग्रन्थो वैज्ञानिक–विवेचनाया निकषोपलो विद्यते अत एव न केवलं संस्कृतव्याकरणशास्त्रस्यापूर्वः ग्रन्थः अपितु समग्रार्षवाङ्मयस्यामूल्यो निधिः वर्तते। पाणिनेरनन्तरं कात्यायनः वार्तिकं विरचय्य पाणिनिसूत्राणां समालोचनमकरोत्। वस्तुतः वार्तिकेषु वररूचिना सूत्रोक्तपदार्थानां विवेचनं विहितम्। भगवान् पतञ्जलिः महाभाष्यं विनिर्माय सूत्रवार्तिकयोः समीक्षया सह तदुदाहरणान्यपि चारुन्ययोजयत्। महाभाष्ये प्रायशः सर्वाण्यपि तान्यविषयजातानि स्थाने–स्थाने सपरिकरं विचितानि सन्ति। तथोक्तं वाक्यपदीयकारेण भर्तृहारिणा–

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने।।

**पाणिनिकात्यायनपतञ्जलिः** सूत्रवाव्रिकभाष्यात्मकं व्याकरणं त्रिमुनि व्याकरणमिति जेगीयते।

व्याकरणाध्ययनस्य द्विविधपरम्परा– अष्टाध्यायाः सूत्रक्रमानुसारिणी प्राच्यपठन–पाठन परम्परा बहुकालं यावत् बहुमानमभजत्। सूत्रक्रमम् आधृत्य जयादित्य वामनाभ्यां विरचिता काशिकावृत्तिः बहुलप्रचारं लेभे। एकादशशताब्दीं यावदयमेव व्याकरणाध्ययनाध्यापनमार्गः चरमपदे आसीत्।

प्रोत्साहनं करणीयम्। अस्यां दिशि 'सॉफ्टवेयर इण्डस्ट्रीज' (Software Industries), वाणिज्यिक (Commercial) स्तरे तथा 'आई.आई.टी.' (I.I.T.), एन.आई.टी. (N.I.T.) इत्यादीनाम् अनुसन्धानस्तरे उत्कृष्टतया भूमिकाया भवितव्या। यद्यपि अस्यां दिशि
1. Translinition,
2. Voice recognition इति सम्बन्ध्युपलब्ध्यः (Issues) विशिष्टरूपेण विचारणीया सन्ति। तथापि समन्वितप्रयासैः एताः कठिनताः सरलतया दूरं शक्यन्ते।

**संस्कृतभाषायाः** महत्वं न केवलं भारतीयैरेव अपितु पाश्चात्यैरपि साह्लादमङ्गीक्रियते। विश्वस्य प्राचीनतमं साहित्यमत्रैवोपलभ्यते। भारोपीयपरिवारे संस्कृतभाषैव प्राचीनतमा। तन्मूलकमेव भाषाविज्ञानस्य उद्रवः संस्कृत–ग्रीक–लैटिनभाषाणां तुलनात्मकेनाध्ययनेन भाषाविज्ञानस्य उद्रवः। संस्कृतभाषायामुपलब्धं वाङ्गमयं भाषाशास्त्रीयां सर्वामप्यावश्यकतां पूरयति। संस्कृतभाषामूलकमेव तुलनात्मकादेवशास्त्रस्योत्पत्तिः। अत एव मेकडानल महाभागेनाभिधीयते–'' The discovery of the Sanskrit language led to the foundation of the science of comparative philology an acquaintance with the literature of the Vedas resulted in the foundation of the science of comparative mythology. ''

**मैक्समूलरः** सत्यमेवाह भाषामिमामधिकृत्य–'' The greatest language in the world is the most wonderful and the most perfect''

**श्री के0एम0 मुन्शीमहाभागानामक्षरशः** इदं कथनं सत्यम्–'' Without Sanskrit India would be nothing but a bundle of linguistic groups''

**पाश्चात्यदेशीयाः** अपि संस्कृतभाशा प्रति आकृष्टाः भवन्ति। पण्डितसैय्यदहुसैनशास्त्रीमहोदयः कथयन्ति–'' I find French beautiful, but Sanskrit is the most beautiful'' अतः भारतवर्षस्य संस्कृतेर्मूलमियं संस्कृतभाषा। साहित्ये मानविकमूल्यं बोधस्य चादर्शोपरि दृश्यते। महात्मागान्धी अवदत्–

''संस्कृतं विना भारतीयाः संस्कारविहीना एव।''
संस्कृतभाषाज्ञानं विना भारतीयसंस्कृतेः ज्ञानं नैव भविष्यति।
''यावद् भारतवर्षं स्यात् यावद् विन्ध हिमाचलौ
यावद गङ्गा च गोदा च तावदेव हि संस्कृतम्।''

**संस्कृत भाषाऽध्ययनेन उच्चारणशुद्धिः** शब्दपठनशुद्धिः च जायते। ज्ञानविज्ञानादिविषयेषु अस्याः समृद्धिः प्रसिद्धा। संस्कृतं विना गर्भाधानात् श्राद्धपर्यन्तं ये ये संस्काराः सन्ति ते कदापि न सम्भवन्ति। अतः हिन्दूधर्मस्य यत्किञ्चित् कार्यं तत् सर्वमेव देवभाषां विना नैव सम्पद्यते।

**सन्दर्भः**

1. महाभाष्यप्रथमाह्निकः।
2. मनुस्मृतिः 2–6
3. मनुस्मृतिः 2–7
4. मनुस्मृतिः 2–166
5. ऋग्वेदः 10/57/1
6. यजुर्वेदः 4/13
7. अथर्वेद 12/1/12
8. अथर्वेदः 12/1/63
9. ऋग्वेदः 1/89/1
10. यजुर्वेदः 30/3
11. भारतस्य विरासतः पृ0 सं0–339, 340
12. English Research magzine, July 1987 ad
13. MACDOELL-H.S.L.P-5